# प्रश्न–पत्राणाम् अङ्.क–विभाजन–पत्रम् (ब्लू प्रिंट)
## परीक्षा–उच्चतर माध्यमिक छात्राणां कृते
## (हायर सेकेण्डरी)

कक्षा – एकादशी — पूर्णांक :– 100

विषय – संस्कृत (विशिष्टम्) — समय :– घण्टात्रयम्

| स.क्र. | इकाई | इकाई अनुसोरण आवंटिताङ्कः | अङ्.कवार–प्रश्नानां संख्या पूर्ण | | | | | प्रश्नाः |
|---|---|---|---|---|---|---|---|---|
| | | | 01 अङ्.कः | 04 अङ्.कः | 05 अङ्.कः | 06 अङ्.कः | 10 अङ्.कः | |
| 1. | सन्धिः | 03 | 03 | – | – | – | – | 03 |
| 2. | समासः | 04 | 04 | – | – | – | – | 04 |
| 3. | शुद्धाशुद्धौ | 04 | 04 | – | – | – | – | 04 |
| 4. | शब्दरूपाणि | 04 | 04 | – | – | – | – | 04 |
| 5. | धातुरूपाणि | 04 | 04 | – | – | – | – | 04 |
| 6. | अव्ययम् | 02 | 02 | – | – | – | – | 02 |
| 7. | प्रत्ययः | 04 | 04 | – | – | – | – | 04 |
| 8. | एकपदेन प्रश्नोत्तराणि | 04 | – | 01 | – | – | – | 01 |
| 9. | रिक्तस्थानपूर्तिः | 05 | – | – | 01 | – | – | 01 |
| 10. | युग्म–मेलनम् | 05 | – | – | 01 | – | – | 01 |
| 11. | कथाक्रम संयोजनम् | 05 | – | – | 01 | – | – | 01 |
| 12. | संस्कृत–साहित्य–परिचयः | 06 | – | – | – | 01 | – | 01 |
| 13. | सुभाषितम् | 04 | – | 01 | – | – | – | 01 |
| 14. | एकवाक्येन प्रश्नोत्तराणि | 06 | – | – | – | 01 | – | 01 |
| 15. | कारक प्रयोगः | 05 | – | – | 01 | – | – | 01 |
| 16. | अपठिताशः | 05 | – | – | 01 | – | – | 01 |
| 17. | गद्यम् | 08 | – | 02 | – | – | – | 02 |
| 18. | पद्यम् | 08 | – | 02 | – | – | – | 02 |
| 19. | पत्रलेखनम् | 04 | – | 01 | – | – | – | 01 |
| 20. | निबन्धलेखनम् | 10 | – | – | – | – | 01 | 01 |
| | **पूर्णयोगः** | **100** | **25** | **07** | **05** | **02** | **01** | **40** |

निर्देश : –

प्रश्नपत्रे विंशतिः प्रश्नाः भविष्यन्ति। प्रश्नेषु उपप्रश्नाः अपि विधेयाः। पञ्चविंशतिः अङ्कानाम् वस्तुनिष्ठप्रश्नाः अनिवार्याः भविष्यन्ति।

# प्रादर्श – प्रश्नपत्रम्

## कक्षा – एकादशी

## विशिष्ट – संस्कृतम्

समय : घण्टात्रयम् | पूर्णाङ्क : 100

निर्देशा :– (1) सर्वे प्रश्नाः करणीयाः ।

(2) प्रश्नानां सम्मुखे अङ्काः दत्ताः ।

प्रश्न 1. त्रयाणां प्रश्नानाम् उचितविकल्पं चित्वा लिखत 3

1. मोऽनुस्वारः'' इति सूत्रं अस्ति –

अ. श्चुत्वसन्धेः ब– जश्त्वसन्धेः

स. अनुस्वारसन्धेः द– ष्टुत्वसन्धेः

2. ''रामश्च'' इत्यत्र सन्धिः अस्ति –

अ. जश्त्वसन्धिः ब– परसवर्ण सन्धिः

स. श्चुत्व सन्धिः द– अनुस्वार सन्धिः

3. विसर्गसन्धेः उदाहरणं नास्ति –

अ– कश्चित् ब– नमस्ते

स– मनोरथः द– दिगम्बरः

4. ''पठत्येव'' इत्यत्र सन्धिः अस्ति –

अ– यण्सन्धिः ब– पूर्वरूप सन्धिः

स– अयादि सन्धिः द– गुण सन्धिः

प्रश्न 2. ''क'' भागस्य विग्रहान ''ख'' भागस्य समुचितैः समस्तपदैः सह मेलनं क्रियताम् – 4

| क | ख |
|---|---|
| अ– सिंहात् भीतः | अ– उपगंगम् |
| ब– पुरूषः सिंहः इव | ब– महाराजा |
| स– महान च असौ राजा | स– सिंहभीतः |
| द– गंगायाः समीपम् | द– पुरूष सिंहः |

प्रश्न 3 शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत। 4

1. आत्मनः प्रतिकूलानि परेषां समाचरेत्।

2. क्षमी दाता गुणग्राही स्वामी पुण्येन लभ्यते।

3. आत्रेयः अग्निवेशस्य शिष्यः आसीत्।

4. कुविन्दः धारानगर्यां वसति स्म।

प्रश्न 4 कोष्ठकात् उचितविभक्तिपदं चित्वा वाक्यचतुर्णां वाक्यपूर्तिः क्रियताम् – 4

1. अस्मिन् कक्षे ———————— बालिकाः सन्ति। (सप्त / षड्भिः)
2. ———————— तत्र गमिष्यन्ति। (सर्वे / सर्वान्)
3. ———————— छात्रान् पाठयन्तु (सर्वे / सर्वान्)
4. संसारे ईश्वरः ——————— अस्ति। (दातारः / दातृषु)
5. वानरः ———————— पतति। (वृक्षात् / वृक्षस्य)

प्रश्न 5 उचितैः धातुरूपैः चत्वारि वाक्यानि पूरयत – 4

1. सेवकाः स्वामिनं —————— । (सेव्, लट्लकारे, आत्मने)
2. अहं कार्य ————————। (कृ, लृट्, लकारे)
3. शिक्षकाः अस्माकं परीक्षापरिणामं ————————। (ज्ञा, लट्, लकारे)
4. वृक्षाः परेभ्यः कि ————————। (कृ, लट् लकारे)
5. काकः पिपासया पीडितः ————————। (अस् – लङ्लकारे)

प्रश्न 6 अधोलिखितेषु शब्देषु अव्ययानि चित्वा लिखत। 2

| | | | | | |
|---|---|---|---|---|---|
| 1. | तत्यत् | 3. | सह | 5. | इदानीम् |
| 2. | श्रुत्वा | 4. | सः | 6. | रमा |

प्रश्न 7. अधोलिखित–वाक्येषु स्थूलपदानां प्रत्यायानाम् नामानि लिखत – 4

1– कार्यं **समाप्य** पठ। (        )

2– स्वदेशम् **परित्यज्य** कुत्र प्रस्थितः? (        )

3– भवान् कुत्र **प्रविष्टः** ? (        )

4– **स्मरन्** मा वद। (        )

प्रश्न 8 अधोलिखितप्रश्नेषु चतुर्णां प्रश्नानामुत्तराणि संस्कृतभाषायामेकपदेन देयानि। 4

(क) परोपकराः किमर्थम् ?

(ख) धर्मार्थों यत्र न स्यातां तत्र कान् वक्तव्या ?

(ग) अध्यापनं कस्य स्वधर्मः ?

(घ) कुविन्दः कस्मादृतेऽन्यं कविं न मन्यते ?

(ङ) क्रियावान् पुरूषः कीदृशः भवित ?

प्रश्न 9 प्रदत्तैः शब्दैः पञ्चानाम् रिक्तस्थानानि पूरयत्। 5

(संस्थापितः, प्रतिकूलानि, वित्तेन, नाधमे, नश्यति, संदधानो)

(क) आत्मानः ........................ न परेषां समाचरते्।

(ख) तेन भूषणकविः स्वसभायां .....................।

(ग) याञ्चामोघावरमधिगुण ..................... लब्धकामा।

(घ) सर्वापृथिवी ..................... पूर्णा स्यात्।

(ङ) स्वधर्म ..................... हि प्रेत्य चेह च नन्दति।

(च) गन्धर्वनगरलेखेव पश्यत एव ..................... ।

प्रश्न. 10 अधोलिखितानाम् उचितमेलनं कुरूत। 5

| | **(अ)** | **(ब)** |
|---|---|---|
| (1) | शरीरगैरवत् | राजश्यालः |
| (2) | ऋग्यजुस्साम | अश्वः |
| (3) | शकारः | नीयते |
| (4) | घोटकः | श्रमः |
| (5) | शूलमारोपयितुम् | त्रयी |

प्रश्न. 11 अधोलिखितवाक्यानाम् उचितसंयोजनं कृत्वा एकां कथां लिखत। 5

सः धर्मशीलः किन्तु निर्धनः आसीत्।

सा स्वप्ने तं दर्शनं दत्वा उक्तवती।

कस्मिंश्चिन्नगरे एकः धार्मिकः ब्राह्मणः प्रतिवति स्म।

धर्मे तस्य अचलां श्रद्धां दृष्ट्वा एकदा तस्योपरि धनदेवी लक्ष्मी प्रसन्नं जाता।

किन्तु ब्राह्मणः धर्मे अचलां श्रद्धां त्यक्त्वा किमपि न अयाचत्।

वत्स ! किमिच्छसि ? यत्किमपि इच्छसि तद् याचस्व।

प्रश्न. 12 पण्डितराजजगन्नाथस्य संक्षिप्तपरिचयं लिखत। 6

प्रश्न. 13 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् कण्ठस्थीकृतं सुभाषितद्वयं लिखत। 4

प्रश्न. 14 अधोलिखितप्रश्नेषु त्रयाणां प्रश्नानामुत्तराणि संस्कृतभाषायामेकवाक्येन देयानि। 6

(क) दुर्योधनः कुत्र निमग्नः ?

(ख) कीदृशी लङ्का न रोचते ?

(ग) मूर्खस्यापि जिह्वा कदा जडीभवति ?

(घ) किं वृन्दम् अवसीदति ?

प्रश्न. 15 अधोलिखितेषु पञ्च – अशुद्धकारकवाक्यानां शुद्धिः करणीया। 5

1. बालकः ग्रामे गच्छति।
2. निधिः सिंहेन बिभेति।
3. भिक्षुकः हस्तस्य पङ्ग।
4. विशाला जनकस्य सह हट्टं गच्छति।
5. श्री शिवं नमः।
6. तव नामः किम्।
7. राधा सीता च पाठं पठतः।

प्रश्न. 16 अधोलिखितगद्यांश सम्यक् पठित्वा प्रश्नानामुत्तराणि लिखत।

अन्नजलादिकस्येव व्यायामस्यापि महती आवश्यकता वर्तते शरीरसंवर्धनाय। व्यायामेन शरीरस्थावयवाः पुष्टाः संजायन्ते, रक्तस्य सम्यक् सञ्चारो भवति, स्फूर्तिः प्राप्यते, रोगाः पलायन्ते, जीवनञ्चाह्लादयमं भवति। स्वस्थे शरीरे एव स्वस्थं मस्तिष्कं सम्भवति इति धारणा सर्वमान्या अस्ति।

(क) उपर्युक्तगद्यांशस्य उचितशीर्षंक लिखत ? 2

(ख) स्वस्थमष्तिष्कं कुत्र सम्भवितः ? 1

(ग) स्फूर्तिः मेन प्राप्यते ? 1

(घ) व्यायामस्य आवश्यकता किमर्थं भवति ? 1

प्रश्न 17 अधोलिखित गद्यांशतेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायां देयानि – 8

अ) उज्जयिन्यां हरिस्वामीति विप्रवरः पुण्यसेनस्य भूपतेः प्रधानामात्यो बभूव। तस्यानुरूपायां देवस्वामीति सच्छीलः पुत्रो जातः, तद्वच्च सोमप्रथा नाम लावण्यवती कन्यापि तस्य सम्भूता क्रमेण तु समुल्लसितयौवना सा विवाहयोग्याऽभवत्। तदा सा मातृमुखेन पितरं भ्रातरं न्यवेदयत् अहं तस्यैव कण्ठे मालामर्पयिष्यामि यः शूरो वा ज्ञानी वा विज्ञानी वा भवति।

क) हरिस्वामी कस्य प्रधानामात्यो बभूव ?

ख) हरिस्वामिनः पुत्रयाः नाम किम् ?

ग) देवस्वामी कीदृशः पुत्रः आसीत् ?

घ) पुत्री मातृमुखेन किं न्यवेदयत् ?

ङ) ''सच्छीलः'' इत्यस्य पदस्य सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत?

ब) अत्रान्तरे दुर्योधनस्य मित्रं चार्वाको नाम राक्षसः मुनिवेषधारी युधिष्ठिरं वञ्चयितुम्, 'भोः तृषितोस्मि

पानीयमुपनीयताम्' इत्युच्चैः उद्घुष्यनम् तदावासमाससाद। तेन यथावदपचरितः चार्वाकः वार्ताप्रसङ्गे एवमब्रवीत् प्रथमं भीमदुर्योधनयोः गदायुद्धे प्रवर्तमाने, तीर्थयात्रायाः समागतने सीरिणा, रहस्याहितां संज्ञामासाद्य दुर्योधनो दुश्शासनारिं गाढमभिहत्य वीरसुलभां गतिमनीनयत्।

(क) चार्वाकः कस्य मित्रम् आसीत् ?

(ख) युधिष्ठिरं वञ्चयितुं चार्वाकः उच्चैः किमुक्तवान् ?

(ग) कयोर्मध्ये गदायुद्धमभवत् ?

(घ) दुर्योधनः कं वीरसुलभां गतिमनीनयत् ?

(ङ) 'अभिहत्य' इत्यस्य पदस्य प्रकृतिः प्रत्ययञ्चय पृथक्कुरूत ?

(स) तमुवाच भगवान् आत्रेयः– सर्वेषाम् अपि अग्निवेश। वाय्वादीनां यद्वैगुण्यम् उत्पद्यते तस्य मूलम् अधर्मः तन्मूलं च असत्कर्म पूर्वकृतम्। तयोर्योनिः प्रज्ञापराध एव। तद् यथा, यदा वै देश– नगर – निगम – जनपद – प्रधानाः धर्मम् उत्क्रम्य अधर्मेण प्रजां वर्तयन्ति, तदाश्रितोपाश्रिता पौरजानपपदा व्यवहारोपजीविनश्च तम् – अधर्मम् अभिवर्धयन्ति, ततः सोऽधर्मः प्रसभं धर्मम् अन्तर्धत्ते ततस्तेऽन्तर्हितधर्माणो देवताभिरपि त्यज्यन्ते।

(क) भगवानात्रेयः कम् उवाच ?

(ख) कस्य मूलम् अधर्मः ?

(ग) अधर्मस्य मूलं किम् ?

(घ) देवतागिरी के त्यज्यन्ते।

(ङ) ''वाय्वादीनाम्'' इत्यस्य पदस्य विच्छेदं कृत्वा सन्धि – नाम लिखत।

प्रश्न 18. अधोलिखितपद्यांशतेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायं देयानि – 8

श्रद्धधानः शुभां विद्यामाददीतावरादपि।

अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि।।

(क) शुभां विद्यां कुतः आददीत ?

(ख) अन्त्यादपि किम् आददीत ?

(ग) स्त्रीरत्नं कुतः आददीत ?

(घ) उपर्युक्त – श्लोकस्यान्वयं कुरूत ?

अक्रोधेन जयेत् क्रोधं, असाधुं साधुना जयेत्।

जयेत् कदर्थं दानेन, सत्येनालीकवादिनम्।।

(क) सत्येन कं जयेत् ?

(ख) क्रोधं केन जयेत् ?

(ग) साधुना कं जयेत् ?

(घ) उपर्युक्तश्लोकस्यान्वयं कुरूत ?

पृथिव्यां त्रीणि रत्नानि जलमग्नं सुभाषितम्।

मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।।

(क) मूढ़ैः केषु रत्नसंज्ञा विधीयते ?

(ख) पृथिव्यां कति रत्नानि सन्ति ?

(ग) पृथिव्यां कानि रत्नानि सन्ति।

(घ) उपर्युक्तश्लोकस्यान्वयं कुरूत ?

प्र. 19. स्वस्थ प्राचार्यस्य कृते शुल्कमुक्तये प्रार्थना–पत्रं संस्कृते लिखत। 4

अथवा

स्वस्य वार्षिक परीक्षा परिणामं सूचयितुं स्वस्य पितरं प्रति संस्कृते पत्रं लिखत।

प्र. 20 अधोलिखितेषु एक विषयं स्वीकृत्य शतशब्देषु संस्कृते निबन्धं लिखत। 10

1. प्रजातन्त्रशासनपद्धतिः
2. संस्कृतभाषायाः गौरवम् ।
3. भारतीयं विज्ञानम्।
4. पर्यावरणस्य रक्षणम्।

# प्रादर्श – उत्तरपत्रम्
# कक्षा – एकादशी
# विशिष्ट – संस्कृतम्

समय : घण्टात्रयम् पूर्णाङ्क : 100

निर्देशा :

1. सर्वे प्रश्नाः करणीयाः।

उत्तर 1– 1 X 3 = 3

1– स– अनुस्वार सन्धेः

2– स– श्चुत्व सन्धिः

3– द– दिगम्बरः

4– अ– यण् सन्धिः

उत्तर 2 1 X 4 = 4

| | क | | ख |
|---|---|---|---|
| अ– | सिंहात् भीतः | स– | सिंहभीतः |
| ब– | पुरूषः सिंहः इव | द– | पुरूषसिंहः |
| स– | महान् च असौ राजा | ब– | महाराजा |
| द– | गंगायाः समीपम् | अ– | उपगंगम् |

उत्तर 3 1. न। 2. आम्। 3. न। 4. आम्। 4

उत्तर 4 1 X 4 = 4

1. सप्त 2. सर्वे

3. सर्वान् 4. दातारः

5. वृक्षात्

उत्तर 5. 1 X 4 = 4

1. सेवन्ते 2. करोमि

3. जानन्ति 4. कुर्वन्ति

उत्तर 6 1 X 2 = 2

सह, इदानीम्

उत्तर 7 1 X 4 = 4

1– ल्यप् प्रत्यय 2– ल्यप् प्रत्यय

3– क्त प्रत्यय 4– शतृ प्रत्यय

उत्तर 8 4

(क) पुण्याय। (ख) विद्या (ग) ब्राहमणस्य।

(घ) कालिदासात्। (ङ) विद्वान्

उत्तर 9 5

(क) प्रतिकूलानि। (ख) संस्थापितः। (ग) नाधमे।

(घ) वित्तेन। (ङ) संदधानो। (च) नश्यति।

उत्तर 10 (अ) (ब) 5

| | (अ) | (ब) |
|---|---|---|
| (1) | शरीरगैरवत् | श्रमः |
| (2) | ऋग्यजुस्साम | त्रयी |
| (3) | शकारः | राजश्यालः |
| (4) | घोटकः | अश्वः |
| (5) | शूलमारोपयितुम् | नीयते |

उत्तर 11 कस्मिंश्चिन्नगरे एकः धार्मिकः ब्राह्मणः प्रतिवसति स्म। 8

सः धर्मशीलः किन्तु निर्धनः आसीत्।

धर्मे तस्य अचलां श्रद्धां दृष्ट्वा एकदा तस्योपरि धनदेवी लक्ष्मी प्रसन्ना जाता।

सा स्वप्ने तं दर्शनं दत्वा उक्तवती।

वत्स! किमिच्छसि ? यत्किमपि इच्छसि तद् याचस्व।

किन्तु ब्राह्मणः धर्मे अचलां श्रद्धां त्यक्त्वा किमपि न अयाचत्।

उत्तर 12 संस्कृतस्य परवर्तिकाव्यशास्त्रिषु पण्डितराजजगन्नाथः महत्वपूर्णः आचार्यः। एषः न केवलं काव्यशास्त्री अपितु उत्कृष्टः महाकविः वर्तते। अनेन विरचितानि अनेकानि काव्यानि प्रसिद्धानि सन्ति। तद्यथा गङ्गालहरी, यमुनालहरी, भामिनी, विलास, इत्यादीन। काव्यशास्त्रमधिकृत्य असौ रसङ्गाधरनामानं प्रसिद्धं ग्रन्थं रचितवान्। अस्य समयः ईशवीयसप्तदशशताब्दी अस्ति। एषः मुगलशासकस्य शाहजहाँ इत्याख्यस्य राजसभायाम् आसीत् 6

उत्तर 13 प्रत्येकशुद्धसुभाषितस्य कृते अङ्कद्वयं निर्धारितम्। 4

उत्तर 14 (क) दुर्योधनः कस्मिंश्चित् विपिनसरसि निमग्नः। 6

(ख) स्वर्णमयीलङ्का न रोचते।

(ग) निरन्तरप्रार्थनारते मूर्खस्यापि जिह्वा जडी भवति।

(घ) यत्र सर्वे विनेतारः, पण्डितमानिनः तथा च सर्वे महत्वमिच्छन्ति तद् वृन्दम् अवसीदति।

उत्तर 15 5

1. बालकः ग्रामम् गच्छति।
2. निधिः सिंहात् बिभेति।
3. भिक्षुकः हस्तेन पङ्ग।
4. विशाला जनकेन सह हट्टं गच्छति।
5. श्रीशिवाय नमः।
6. तव नाम किम्।
7. राधा सीता च पाठं पठतः।

उत्तर 16 (क) व्यायामः 2

(ख) स्वस्थमष्तिष्कं स्वस्थे शरीरे सम्भवित। 1

(ग) स्फूर्तिः व्यायामेन प्राप्यते। 1

(घ) शरीरसंवर्धनाय व्यायामस्य आवश्यकता भवति। 1

उत्तर 17 अ) (क) हरिस्वामी पुण्यसेनस्य भूपतेः प्रधानामात्यो बभूव। 4 X 4 = 8

(ख) हरिस्वामिनः पुत्रयाः नाम सोमप्रभा आसीत्।

(ग) देवस्वामी सच्छीलः पुत्रः आसीत्।

(घ) पुत्री मातृमुखेन न्यवेदयत् यत् अहं तस्यैव कण्ठे मालार्पयिष्यामि यः शूरो वा ज्ञानी वा विज्ञानी वा भवति।

(ङ) सत् + शीलः – व्यञ्जन संधिः।

(ब) (क) चार्वाकः दुर्योधनस्यं मित्रम् आसीत्।

(ख) युधिष्ठिरं वञ्चयितुं चार्वाकः उच्चैः 'भोः तृषितोऽस्मि पानीयमुपनीयताम्' इति उक्तवान्।

(ग) भीमदुर्योधनयोर्मध्ये गदायुद्धमभवत्।

(घ) दुर्योधनः दुःशासनारिं वीरसुलभां गतिमनीनयत्।

(ङ) अभि + हन् + ल्यप्

(स) (क) भगवानात्रेयः अग्निवेशम् उवाच।

(ख) वाय्यादीनां यद्वैगुण्यम् उत्पद्यते तस्य मूलमधर्मः।

(ग) पूर्वकृतम् असत्कर्म अधर्मस्य मूलम्।

(घ) अन्तर्हितधर्माणः देवतागिरी त्यज्यन्ते।

(ङ) वायु+आदीनाम् – यण् स्वरसन्धिः।

उत्तर 18 अ 4 X 4 = 8

(क) शुभां विद्याम् अवरादपि आददीत।

(ख) परं धर्मं अन्त्यादपि आदतीत।

(ग) स्त्रीरत्नं दुष्कुलादपि आदतीत।

(घ) श्रद्धधानः अवराद् अपि शुभां विद्याम् एवम् अन्त्यादपि परं धर्मं दुष्कुलाद् अपि च स्त्रीरत्नम् आददीत।

(ब)

(क) सत्येन अलीकवादिनं जयेत्।

(ख) क्रोधम् अक्रोधेन जयेत्।

(ग) साधुना असाधुं जयेत्।

(घ) क्रोधम् अक्रोधेन जयेत् असाधुं साधुना जयेत् कदर्थं दानेन जयेत् अलीकवादिनं सत्येन जयेत्।

(स)

(क) मूढ़ैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।

(ख) पृथिव्यां त्रीणि रत्नानि सन्ति।

(ग) पृथिव्यां जलम् अन्नं सुभाषितम् एतानि रत्नानि सन्ति।

(घ) पृथिव्यां जलम् अन्नं सुभाषितम् त्रीणि रत्नानि (सन्ति) मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।

उत्तर 19 पत्रे सङ्केतं, सम्बोधनं दिनाङ्कं दृष्ट्वा शुद्धपत्रस्य कृते चत्वारः अङ्काः प्रदानीयाः। 4

उत्तर 20 सम्पूर्णशुद्धनिबन्धस्य कृते दश अङ्का निर्धारिताः सन्ति। 10